# श्रीमाधवतीर्थस्तोत्रम्

मध्वाचार्याप्तसन्न्यासं मध्वाचार्यसुसेवकम् ।
मध्वाचार्याप्तसद्विद्यं माधवार्यमहं भजे ॥1॥

नृहर्यार्याप्तसंस्थानं मूलरामसुपूजकम् ।
आशाजिद्रामपूजेतं माधवार्यमहं भजे ॥2॥

पंचव्यासशिलापूजां कुर्वाणं भक्तिपूर्वकम् ।
वामनाद्यर्चकं भक्त्या माधवार्यमहं भजे ॥3॥

द्युनामकतिरोवंशश्रीश्रितो योंऽतरिक्षगः ।
श्रीमध्वमध्वपूपस्तु तद्गो यो मधुनामकः ॥4॥
श्रीहरी रामरूपस्तु वंशराम इति स्मृतः ।
तत्पूजानुगुणाख्येतं माधवार्यमहं भजे ॥5॥

वंशवृद्धिकरो यस्तु मोक्षानंदप्रदस्तथा ।
वंशरामस्तदर्चेतं माधवार्यमहं भजे ॥6॥

मानां सर्वप्रमाणानां मुख्यबोध्यतया धवः ।
हरिरित्यादिशंतं ज्ञं माधवार्यमहं भजे ॥7॥

मा न चास्ति धवः स्वामी हरेरन्य इति स्फुटम् ।
युक्त्यागमैः साधयंतं माधवार्यमहं भजे ॥8॥

वैराग्यदृढभक्तुत्थसदुपासनजां हि माम् ।
सधवां बोधयंतं ज्ञं माधवार्यमहं भजे ॥9॥

मणिपुरवरसंस्थे मूलवृंदावने यो
सकलबुधसमीड्यो राजते ज्ञानिवर्यः ।

श्रुतिवरमुनिमान्यो माधवार्यो महात्मा ।
भगवति निजभक्तिं मे प्रदद्यात्सदात्मा ॥10॥

माधवार्यं स्मरन् भक्त्या यः पठेत् स्तोत्रमुत्तमम् ।
सत्यात्मभिक्षुरचितं स सर्वाभीष्टभाग्भवेत् ॥11॥

॥ इति श्रीसत्यात्मतीर्थश्रीपादविरचितं श्रीमाधवतीर्थस्तोत्रम् ॥